11

0975CH11

# धातुरूपाणि

संस्कृतभाषायां क्रियार्थं धातुरूपाणां प्रयोग: भवति। धातुरूपेषु पञ्चलकाराणां मुख्यत: प्रयोग: भवति। यथा —

**लट्लकार:**
**(वर्तमानकाले)**



**जन: चलदूरभाषे चित्राणि पश्यति।**

**लङ्लकार:**
**(भूतकाले)**



**ह्य: त्वं कुत्र आसी:?**

**लृट्लकार:**
**(भविष्यत्काले)**



**श्व: आवाम् आपणं चलिष्याव:।**

**लोट्लकार:**
**(आज्ञार्थे)**



**अत्र मा तिष्ठ।**

## विधिलिङ्लकार
**(संभावनार्थे)**



**संभवत: अद्य वर्षा भवेत्।**

प्रत्येकं लकारे त्रय: पुरुषा: त्रीणि वचनानि च भवन्ति। अधुना वयं लट्लकारस्य माध्यमेन कर्तृ-क्रिया-अन्विर्तिं प्रदर्शयन्तीम् इमाम् तालिकाम् अवगच्छाम:-

**लट्लकार: (पठ् धातु)**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथम: पुरुष:** | पठति | पठत: | पठन्ति |
| **(कर्तृपदम्)** | (स:,सा,तत्) | (तौ,ते,ते) | (ते,ता:,तानि) |
| **मध्यम: पुरुष:** | पठसि | पठथ: | पठथ |
| **(कर्तृपदम्)** | (त्वम्) | (युवाम्) | (यूयम्) |
| **उत्तम: पुरुष:** | पठामि | पठाव: | पठाम: |
| **(कर्तृपदम्)** | (अहम्) | (आवाम्) | (वयम्) |

एवमेव सर्वासु धातुषु सर्वेषु लकारेषु च क्रियाया: (धातुरूपाणां) प्रयोग: भवति।

**1. कोष्ठके प्रदत्त-धातूनाम् उचितै: रूपै: रिक्तस्थानानि पूरयत —**

i. ये छात्रा: कक्षायां ध्यानेन पाठं .................................. (श्रु, लट्), ते अभीष्टं परिणामं .................................. (लभ्, लट्)।

ii. भो छात्रा:! जंक इति भोज्यवस्तूनि तु कदापि मा .................................. (भक्ष्, लोट्)

iii. अनुशासनबद्ध: बाल: यथाकालं सर्वं कार्यं कर्तुं ..................................। (शक्, लट्)

iv. पुत्र! .................................. (दृश्, लोट्) स्वलेखम्। त्वं ध्यानेन सुलेखं ..................................। (लिख्, लोट्)

v. पित:! अद्याहम् ध्यानेन लिखित्वा भवते ..............................। (दृश्, लृट्)

vi. रमा आश्रमे पुष्पाणि ..............................। (चि, लट्)

vii. यदि अहम् एतत् कार्यं कुर्याम् तर्हि कमुपहारं ..............................? (लभ्, लृट्)

viii. ये जना: यत्किमपि अखाद्यम् .............................. (भक्ष्, लट्) ते प्राय: अस्वस्था: ........................ (भू, लट्)

ix. भो बाला:! कमपि प्राणिनं मा .............................. (तुद्, लोट्)

x. भवान् किं सत्यं .............................. (ब्रू, लट्)

**2. रेलदुर्घटनाया: विषये प्रकाशितेऽस्मिन् समाचारपत्रे धातुरूपाणाम् अशुद्धय: सञ्जाता:। एतत् समाचारपत्रं पठित्वा क्रियापदानि शुद्धानि कुरुत–**

**यथा –**

**ह्य: अहम् समाचार-पत्रे <u>पठामि</u> अपठम् यत् रेलदुर्घटनायाम् अनेके जना: आहता:।**

i. केचन जना: तान् असेवन् परम् दु:खस्य ..............................

ii. विषय: एष: सन्ति यत् केचित् दुर्जना: तेषां ..............................

iii. धनस्यूतम् अचोरय: येन अनेकेषां तु ..............................

iv. परिचयपत्रमपि न अमिलत्। इतोऽपि ..............................

v. अधिकं यत् तेषां दु:खेन संवेदनहीना: ..............................

vi. जना: तु केवलं स्वचलदूरभाषयन्त्रेण तस्या: ..............................

vii. घटनाया: वीडियो-निर्माणे संलग्ना: सन्ति। ..............................

**3. उचित-धातुरूपेण रिक्तस्थानानि पूरयत —**

i. न कोऽपि जानाति श्व: किम् .............................. ? (भू)

ii. ह्य: त्वम् आपणात् किं .............................. (क्री)

iii. आगामिवर्षे अहम् विदेशम् ..............................। (गम्)

iv. अधुना त्वं किं ..............................। (पच्)

v. गतदिवसे अहम् एतत् पुस्तकम् ..............................। (इष्)

vi. परश्व: अहम् तव गृहे ..............................। (स्था)

**4. प्रदत्तैः पदैः वाक्यानि रचयत–**

i. सिञ्चति ..................................................................................

ii. पठेयुः ..................................................................................

iii. कथयानि ..................................................................................

iv. पिबाव ..................................................................................

v. सेवामहे ..................................................................................

vi. आसन् ..................................................................................

vii. लेखिष्यसि ..................................................................................

viii. अपश्यः ..................................................................................

ix. लभन्ते ..................................................................................

x. अस्ति ..................................................................................